**अखिलजगद्ग्रासल** ( akhilajagadgrāsa-la ) *adj.* eager to swallow as a mouthful the entire world ज्वालाजिह्वालताभिर्दिवमखिलजगद्ग्रासलो लेलिहान:( ? लोलो लिहान: ) ।···याति विस्तारमग्नि: TāpaVa. 2. 4.

**अखिलजगद्धातृ** ( akhilajagad-dhātṛ ) *m.* creator or sustainer of the whole world तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिण: । पार्षदाविह संप्राप्तौ BhāgP. iv. 12. 24.

**अखिलजगद्धामन्** ( akhilajagad-dhāman ) *n.* the resort or abode of all the worlds जयाखिलजगद्धामन् SkandP. ii(2). 30. 39.

**अखिलजगद्बन्ध** ( akhilajagad-bandha ) *m.* the ties or fetters of the whole world स जगतीपति:···अखिलजगद्बन्धध्वंसना( ? न )परानुभावस्य भगवत: ···अङ्घ्रियुगलानवरतध्यानानुभावेन ··· महीतलमनुशशास BhāgP. v. 1. 23.

**अखिलजगद्भार** ( akhilajagad-bhāra ) *m.* the burden of the whole world or all the worlds जयाखिलजगद्भारधारणश्रमवार्जित SkandP. ii(2). 30. 51.

**अखिलजगद्भीषण** ( akhilajagad-bhīṣaṇa ) *adj.* terrifying to the whole world कुर्वाते मल्लवर्यौ रणमखिलजगद्भीषणं गर्जयन्तौ S'ṛṅgāBhū. 72.

**अखिलजगद्रक्षण** ( akhilajagad-rakṣaṇa ) *n.* protection of the entire world नृपतिरथ···। अध्यासामास पृथ्वीं चिरतरम् ··· अखिलजगद्रक्षणे जागरूक: MātaLī. 12. 28.

**अखिलजगद्विजय** ( akhilajagad-vijaya ) *m.* victory over the whole world लक्ष्मणाग्रज: ··· अखिलजगद्विजयवर्णावलीमतिनिर्णायकैरनेकविधसमीकाभिघातमग्नभग्नैरावणविषाणकुलिशाग्रैरुत्कीर्णविशालवक्ष:स्थलफलकम् ··· ददर्श दशकन्धरम् RāmāCam. 6. 32 (9)

**अखिलजगन्नाथ** ( akhilajagan-nātha ) *m.* lord of the whole world जयाखिलजगन्नाथ TriṣaS'aPuC. i. 3. 537.

**अखिलजगन्मातृ** ( akhilajagan-mātṛ ) *f.* mother of the whole world पुराखिलजगन्माता सती दाक्षायणी तनुम् । शिवनिन्दाप्रसङ्गेन त्यक्त्वा···सुताभूद्धिमवद्गिरे: S'ivaP. vi. 2. 6 (472A. 8)

**अखिलजड** ( akhila-jaḍa ) *adj.* all insentient ( things ) अखिलजडमिदं वस्तुजातं कथं स्याम् S'atS'lo. 92; अत्र भूतशब्दोऽखिलजडोपलक्षक: YogSā. 13. 12(1)

**अखिलजन** ( akhila-jana ) *m.* all the people अखिलजनमध्ये सिंहपददर्शनकृतपरिशुद्धि: सिंहपदमनुससार ( भगवान् ) ViṣṇuP. iv. 13. 38; तस्य च महामहीपते:···अखिलजननयनकुरङ्गवागुरा···अस्ति प्रिया प्रियङ्गुमञ्जरी नाम NalaCam. 2. 29(3); गृहाणेदमानीतं मया ··· अखिलजनदृष्टिहारि हरिचन्दनम् TilaMañ. 288. 13; तदखिलजनतोषदं स्वराज्यं चिरमनुपाल्य सुदंपती विमुक्तौ YogVā. iii. 59. 18; स्युर्मध्वक्त्रैरखिलजना वशेऽस्य लाजै: ĪśānS'iPa. i. 23. 32; महाभाष्यव्याख्यामखिलजनवन्द्यां विदधत: सदा यस्य च्छात्रैस्तिलकितमभूत्प्राङ्गणमपि VikraDeC. 18. 79; सा तिरुवेङ्कटपुरन्ध्री···अखिलजनहृदयनयनानन्दं नन्दनमविन्दत ĀnandRa. 3. 6(5)

**अखिलजनता** ( akhila-janatā ) *f.* all groups of men द्राक्षापूर्णान्यखिलजनताभोगहेतोर्वनानि VikraDeC. 18. 78.

**अखिलजनयितृ** ( akhila-janayitṛ ) *adj.* creator of all अस्यैवाचिन्त्यशक्तेरखिलजनयितु: स्यादुपादानभाव: TattvMu. 3. 25.

**अखिलजनाचार** ( akhilajanācāra ) *m.* practice of all people, general practice संप्रति पुनरस्या अनपेक्षितमप्यनुलेपनादिकमखिलजनाचारविषयतया करणीयमेव RasSa. 34. 3.

**अखिलजनुष्मत्** ( akhila-januṣmat ) *m.* all the creatures सममखिलजनुष्मतां मनोभि: समजनि तावदनाविला त्रिलोकी NīlaVi. 115. 8.

**अखिलजन्तु** ( akhila-jantu ) *m.* all the creatures मधुरिपुं यो रात्रिकालं यजेत् तस्यैवाखिलजन्तुजातदयितस्याम्भोधिजावेश्मन: । हस्ते···°विभवा: PāñcaRā. ( Nā. ) iii. 13. 1; ब्रह्मा दक्षादय: कालस्तथैवाखिलजन्तव: । विभूतयो हरेरेता जगत: सृष्टिहेतव: ViṣṇuP. i. 22. 31; सुवृत्तमखिलजन्तुजीवनेन मातरिश्वना MālaMā. 9. 284; तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु । ··· भगवान् संप्रसीदति BhāgP. iv. 11. 13.

**अखिलजन्मन्** ( akhila-janman ) *adj.* from whom everything is born अयं हि सर्वलोकस्य विष्णोरखिलजन्मन: ।···अंश: ViṣṇuP. v. 20. 50.

**अखिलजन्मन्** ( akhila-janman ) *n.* all lives अहो नृजन्माखिलजन्मशोभनम् BhāgP. v. 13. 21; अथ पुरातनरामायणं कथयामि यस्य श्रवणेनाखिलजन्मसंपादितपापक्षयो जायते PadmP. iv. 112. 12(5)

**अखिलजन्मीय** ( akhila-janmīya ) *adj.* pertaining to all lives अत: प्रवेशादखिलजन्मीयपापनाश: TristhaSe. 99. 9.

**अखिलजन्यकाल** ( akhilajanya-kāla ) *m.* time (or occasion) of all the wars क्षमापराधं मम सर्वशक्ते जयं प्रयच्छाखिलजन्यकाले GaṇeP. i. 45. 13.

**अखिलजीव** ( akhila-jīva ) *m.* all beings मुक्तयेऽखिलजीवानामुदेमि परमेश्वरात् LakṣmīT. 20. 7; त्वया प्रसुप्तं परिसुप्तशक्तिव्रजेन तत्राखिलजीवधाम्ना Nārāy. iii. 8. 7.

**अखिलजीविन्** ( akhila-jīvin ) *m.* all living beings ( त्वम् ) अखिलजीविनाम् । प्राणा: VāmaP. 47. 121.

**अखिलज्ञ** ( akhila-jña ) *adj.* knower of all आचार्यस्वामी···अखिलज्ञान् स्वशिष्यान् पद्मपादहस्तामलकमुखान् आज्ञापयामास S'aṅkaVi.( Ā. ) 162. 19.

**अखिलज्ञता** ( akhilajña-tā ) *f.* the state of knowing all, omniscience एकवस्तुसमोऽशश्वेत्वादिबोधेऽखिलज्ञता IṣṭaSi. 310. 22.

**अखिलज्ञप्ति** ( akhila-jñapti ) *f.* knowledge of all (the Vedas) तदन्येषां यथायोगमखिलज्ञप्तिरिष्यते AnuVyā. 49A. 1 (*on* 3. 3)

**अखिलज्ञानमय** ( akhilajñāna-maya ) *adj.* full of all knowledge जयाखिलज्ञानमय···प्रभो ViṣṇuP. i. 4. 21.

**अखिलज्ञापक** ( akhila-jñāpaka ) *adj.* making everything known नाखिलज्ञापको विष्णुरज्ञेयो नियमेन हि AnuVyā. 70A. 8 (*on* 4. 2)

**अखिलज्ञेय** ( akhila-jñeya ) *n.* all the objects of knowledge स्ववृद्धिनि:श्वासनिमेषभाजि प्रत्यक्षमात्मानुभवेऽपि मूढ: । किं चाखिलज्ञेयविवर्तिबोधस्वरूपमध्यक्षमवैति लोक: Viṣāpahā. 22; ज्ञानमेवैकमखिलज्ञेयाकारं प्रभासते AnuVyā. 31A. 7 (2. 2)

**अखिलज्योतिर्विद्** ( akhila-jyotirvid ) *m.* all astrologers, every astrologer रन्ध्रे मिश्रबले शुभाशुभखगैरालोकिते वा युते दम्पत्यो: समकालमृत्युमखिलज्योतिर्विद: संविदु: JātaPā. 16. 44.

**अखिलज्योतिस्** ( akhila-jyotis ) *n.* name of Jina (light of all) मूलकर्ताखिलज्योति: ( धाम्नां पते तवामूनि नामानि ) MahāP. 25. 209.

**अखिलज्वरसंभव** ( akhilajvara-sambhava ) *m.* effects or occurrences of all fevers सर्वाङ्गरुक्क्षवथुगौरवरोग( ? म )हर्षा रूपाणि पूर्वमखिलज्वरंस( ? रसं )भवेषु KalyāKā. 9. 52.

**अखिलतटिनी** ( akhila-taṭinī ) *f.* all rivers चूर्णीचर्कर्त्यखिलतटिनीगर्वसर्वस्वमेषेत्यार्याश्चूर्णीत्यखिलविदितं नाम यस्या गृणन्ति MayūSaṁ. 1. 88.

**अखिलतत्त्व** ( akhila-tattva ) *n.* **1** all the elements तत्त्वयोगमतो वक्ष्ये···। शुद्धयेऽखिलतत्त्वानाम् PauṣkS. 33. 91; तथैवाखिलतत्त्वानामौपाधिकमुदाहृतम् । परत्वमब्जसंभूत न कश्चित् तत्त्वत: परम् PauṣkS. 20. 64; पृथिव्यादीनि तत्त्वानि विश्लिष्य जुहुयात्तत: । वह्नावखिलतत्त्वानामालये व्याहृते हरौ AgniP. 27. 42; अखिलतत्त्वपथोत्तीर्णम् ··· साक्षाच्चकार दाक्षायणीरमणम् NīlaVi. 96. 5; **2** all truths, the whole or entire truth सनन्दनाद्यैर्मुनिभिस्तथोक्तं श्रीनारदा( या )खिलतत्त्वसाक्षिणे SiddhāRa. 6 (74. 5)

**अखिलतत्त्वार्थ** ( akhila-tattvārtha ) *m.* truth about everything त्वमेकोऽखिलतत्त्वार्थं जानासि मुनिसत्तम PadmP. iv. 86. 5.

**अखिलतत्पण** ( akhila-tatpaṇa ) *m.* all his merchandise, all his wares तयोरेकं च त्वं हत्वा गृहीत्वाखिलतत्पणम् । अपरं हन्तुमुद्युक्ते स दुद्राव भयाद् द्रुतम् SkandP. ii(7). 15. 41.

**अखिलतनु** ( akhila-tanu ) *adj.* having everything as one's form य: प्रोक्त: सर्वकर्तु: परमखिलतनोर्नापरं किंचिदस्ति TattvMu. 3. 7; तत्तत्तत्त्वैर्विशिष्टो हरिरखिलतनुस्तासु विद्यासु वेद्य: TattvMu. 3. 9.

**अखिलतनुभृत्** ( akhila-tanubhṛt ) *m.* all embodied beings, all corporeal beings प्राणस्य प्राण एषोऽप्यखिलतनुभृतां चक्षुषश्चक्षुरेष: S'ātS'lo. 89; दक्ष: श्रीवेङ्कटेन्द्र:···स्वोद्यत्प्रेमानुबन्धानखिलतनुभृत: पालयन् लीलयैव ĀnandRa. 5. 29.

**अखिलतन्त्र** ( akhila-tantra ) *n.* **i** all the sciences स्कन्दांशज: स द्विजसार्वभौमस्तारुण्य एवाखिलतन्त्रवेदी S'ivLī. 22. 5; **ii** all Tantric Texts, the whole Tantra lore तत्क्लिष्टमखिलतन्त्रविरुद्धं यद्वा तद्वा चेत्युपेक्ष्यम् SetuBa. 60. 21.

**अखिलतपोधन** ( akhila-tapodhana ) *m.* all ascetics एतस्या: क्षितिधरकाननस्रवन्त्या: कूलेऽस्मिन्नखिलतपोधनानुकूले । ···एतत्त्वं परिचरितुं त्वरस्व तत्त्वम् Surath. 12. 12.

**अखिलतरुणी** ( akhila-taruṇī ) *f.* all young women अत्र राधारमणस्याखिलतरुणीजनच्छन्नानुरागगरिमास्पदत्वं न विदितम् Loc. 105. 20 (2. 24); वहन्तीं गात्रामिख्यामखिलतरुणीगर्वनिर्वाणहेतुम् । पश्यामि त्वाम् RasSa. 237.

**अखिलतस्** ( akhila-tas ) *adv.* **i** completely तन्मेऽखिलतो नस्यविधानं समुपदेष्टुमर्हसि भगवन् Hastyāyur. 619. 3 (4. 7); चित्ते चित्ते विशति ··· स्रोतस्यूते बहिरखिलतो व्याप्तिशून्ये च पुंसि । येषां ज्योति: YaśasCam. ii. 382. 2; **ii** [Abl.] from each तथोत्थायोत्थाय स्थलजलतृणादेरखिलत: पदार्थाद्यान्सृष्टिस्रवदमृतपूरैर्विकिरसि Stotrā. 12. 3.

**अखिलताप** ( akhila-tāpa ) *m.* all afflictions छाययाखिलतापघ्न: ··· । इत्येतत् कथितम्···। नाम्नां सहस्रम्···चक्रराजस्य सत्पते: AhirbuS. App. 21 (654. 13); वयमामोदिता दिताखिलतापा भवद्भि: CaitaCa. 28. 17(1)

**अखिलतापिन्** ( akhilatāp-in ) *adj.* having sun-shine all over भर्तुर्वि-